श्रीमते रामानुजाय नमः

**श्रीमते रामानुजाय नमः**

**श्रीमद् वरवर मुनये नमः**

**श्रीमद् वानमहाचल गुरुभ्यो नमः**

# ॥ श्रीदेवनायक सुप्रभात स्तोत्रं ॥

श्रीवल्लिमङ्गया नित्यं श्रियालिङ्गितवक्षसः।
श्री देवनायकस्याङ्घ्री शिरोभूषणमस्तु मे॥ १

श्रीभट्टनाथवानाद्रि रामानुजमुनेः पदौ।
शिरसानम्य देवेश सुप्रभातं वितन्यते॥ २

श्रीदेवनायक विभो जगदेकनाथ श्रीकर्णयोः कुरु गिरं तव किङ्करस्य।
एता मवद्यभरितामपि मे दयाब्धे मातेव वत्सलतमा निजबालकस्य॥ ३

सन्तः श्रुतिप्रणयिवाग्विभवा अपीह सङ्कीर्तने गुणनिधे स्तव सङ्कुचन्ति।
सत्येव मीडितुमना निरपत्रपस्त्वां सजजीभवामि वशगो ननु चापलस्य॥ ४

तत्रापि विश्वजननस्थिति संहृतीनां कर्तार मेकमपि सन्ततजागरूकं।
सङ्कल्पयननु विभोधयितुं भवन्तं सत्यं प्रमत्त इव यत्किमपीह कुर्वे॥ ५

श्री भूमिपाणिकमलैः परिमृष्टगात्र श्री गोदया धृपदाम्बुज शेषतल्पे।
देव्याङ्कचायित मुदा वरमङ्गया श्री देवेश जागृहि तवाध्य हि सुप्रभातं॥ ६

लक्ष्मीमहीदिननिशाकरदेवकन्या युग्मैः समं भृगुमृगण्डुतनूभवाभ्यां।
वेदात्मपत्रिपतिना च वलाधिपेन तोदाद्रिनाथ भगवंस्तव सुप्रभातं॥ ७

भास्वानिदेष्यति समृद्धकरः पुरस्तात् पस्चाद्विधुर्विगतभा विलयं प्रयाति।
एवम् जगन्निजकृतानुगुणं नियोक्तुः देवाधिनाथ तव सम्प्रति सुप्रभातं॥ ८

हेयद्विषं शुभगुणैकनिकेतनं त्वां ध्येयं दिदृक्षव इमे सनकादिसिद्धाः।
स्वायम्भुवाः सुरपते स्वयमागता स्तत् स्वीयं विमुञ्च शयनं तव सुप्रभातं॥ ९

श्रीवास तावकतपोवनगा मुनीन्द्राः सेवारता भुजगतल्पत उद्यतस्ते।
श्रीवासगेह मुपयान्ति हि सेमशाद्याः देवादिराज तव सम्प्रति सुप्रभातं॥ १०

रामानुजो यतिपतिः सह शिष्यवृन्दैः रामानुजस्य तव देव यथा यशोदा।
प्राभोधकीं समुगायति सूक्तिमालां स्वापात्प्रबुद्धय सुरनायक सुप्रभातं॥ ११

वानाद्रिलक्ष्मणमुनि स्तव वल्लिमङ्गा दानात्प्रहृष्टहृदयः स्वसुतां प्रबुद्धां।
एनां पिपृच्छिषति सुस्वपनं रजन्यां मानाथ मानय गुरुं तव सुप्रभातं॥ १२

आम्नायशीर्षयुगपारगता द्विजास्त्वन् नांनां सहस्र मनघं परिकीर्तयन्तः।
धाम्नोज्वलं तव निकेतमुपागतास्तान् भूम्ना श्रियां धिनु सुराधिप सुप्रभातं॥ १३

दिव्यावरोधत उपांशु विनिर्यतस्ते सिंहक्रमोपमगते रवलोकनाय।
श्रीवैष्णवाः समधिकं स्पृहयन्त्यमीषां सेवां सुरेश विसराद्य हि सुप्रभातं॥ १४

नानानुभाव नरदेवगणा श्चिरेण सेनाधिपानुमतिलब्धसभाप्रवेशाः।
धर्मासनं दृतकराः परिवृणवते तान् शर्मार्पितान् कुरु दृशा तव सुप्रभातं॥ १५

क्लिष्टस्य धूः सुरपते ननु बिष्टपस्य शिष्टेष्टसंघटनदुष्टनिबर्हणाख्या।
त्वययेव नाथ विततायतते यतस्स्वां शय्यां जहाहि भगवं स्तव सुप्रभातं॥ १६

श्रीमते रामानुजाय नमः

पद्मासखल्य भवतः परिचर्ययालं विस्मापितो निशि पराङ्कुशसूरिरद्य।
सेवारसं वदितुमिच्छति नैजगोष्ठ्यां देवास्य देह्यनुमतिं तव सुप्रभातं॥ १७

भावत्कदिव्यनगरीविशिखासु विप्राः श्राव्यस्वनाक्षरमुखाः स्तुवते भवन्तं।
प्रत्नैः शुकोक्तिहरिवंश पुराणरत्नैः यत्नेन दैवतपते तव सुप्रभातं॥ १८

वैकुण्ठनामकविमानगजालरन्ध्रैः वैभातिकाः शयनधाम विशन्ति वाताः।
देवीसुगन्धिमुखवातजिगीषयेव देवाधिनायक तवाद्य हि सुप्रभातं॥ १९

त्वन्नामकीर्तनविधौ महिषीविनीतैः स्वर्णाभपञ्जरगतैः शुकशारिकाद्यैः।
स्वर्णाथ ते समुदितान् गुणनामवर्णान् कर्णागतान् कलय सम्प्रति सुप्रभातं॥ २०

श्रुत्वा त्वदीयसहकारवनोपकण्ठे सोत्कण्ठविस्तृतशिखण्डकनीलकण्ठाः।
नृत्यन्ति नीरदरवाम् हि विभातभेरीम् निद्राम् जहीहि सुरनायक सुप्रभातम्॥ २१

आम्रद्रुमोपवननीडनिकेतभाजः कम्रस्वनाः परभृताः कलकूजिनेन।
धिन्वन्ति नित्यविबुधा इव दिव्यसाम्ना श्रीमन् भवन्त ममराधिप सुप्रभातं॥ २२

श्रीपङ्कपङ्कजसरोवरराजहंसाः देवीसहस्रमणिनूपुरशिञ्जितानि।
तल्बोग्दगमावसरजान्यनुकर्तुकामाः शय्यां त्यजन्ति परितस्तव सुप्रभातं॥ २३

कामाभिधानसुमनोवनिताभिरामाः रामा रमेश सुमनोवरदामहस्ताः।
त्वामादरेण नचिरेण बुभूषिषन्ति जामातरं निजगुरो स्तव सुप्रभातं॥ २४

धाटीषु ते रथगजाश्वषदातियोधान् आटीकयत्यतुलवेत्रलतेङ्गितैर्यः।
सेनापतिर्वितनुते जयघोषमद्य वानाद्रिकन्दरहरे तव सुप्रभातं॥ २५

प्रातः परिक्रमकृते सुकृतां प्रतोळीं यातः परिष्कृतगृहा नगरीपुरन्ध्र्यः।
नीराजनाय भवतो नितरां त्वरन्ते स्वाराध देवरमणाद्य हि सुप्रभातं॥ २६

शौर्यप्रशस्तिरिह ते स्नपनप्रक्लुप्तिः तौर्यत्रिकप्रसृतिरत्र च सौरभेयी।
शङ्खान् धमन्त इह मङ्गलवादिसङ्घः सर्वं समर्थय विभो तव सुप्रभातं॥ २७

वर्णस्वरार्थपदभावविशुद्धिवर्जं कर्णान्तरङ्गकटुकं कविताभिमानात्।
सञ्जल्पितं त्रिदशनाथ तव प्रसादात् अञ्जत्विदं सगुणता मिति सुप्रभातं॥ २८

गोपालार्यकविप्रोक्तं देवाधिपविबोधनं।
सुप्रभात मधीयानः क्षिप्रमिष्ट मवाप्नुयात्॥

**॥ श्रीदेवनायक सुप्रभात स्तोत्रं समाप्तं॥**